४८८ संस्कृत

क्र.नं. १४३

याज्ञिक

प्रयोग-८-मार्त

महाप्रयोग

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

॥श्री॥ अथमहाभास प्रारंभः॥ श्रीदत्त ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

म॰न्या॰

॥१॥

श्रीगणेशायनमः॥ हरि ॐ॥ अथातःपंचांगरुद्राणां न्यासपूर्वकं जपहोमार्च
नविधिं व्याख्यास्यामः॥ ॐ यातेरुद्रशिवातनूरघोरापापकाशिनी॥ तयान
स्तनुवाशंतमयागिरिशंताभिचाकशीहि॥ शिखायैनमः॥ ॐ अस्मिन्महृ
त्यर्णवेंतरिक्षेभवा अधि॥ तेषाꣳ सहस्रयोजनेवधन्वानितन्मसि॥ शिर
सेस्वाहा॥ ॐ सहस्राणिसहस्रशोयेरुद्रा अधिभूम्यां॥ तेषाꣳ सह॰॥ ल
लाटाय॰॥ ॐ हꣳसः शुचिषद्वसुरंतरिक्षसद्धोतावेदिषदतिथिर्दुरोणस
त्॥ नृषद्वरसदृतसद्व्योमसदब्जागोजा ऋतजा अद्रिजा ऋतंबृहत्॥ ॥राम॥
भ्रूमध्यायनमः॥ ॐ त्र्यंबकं यजामहेसुगंधिंपुष्टिवर्धनं॥ उर्वारुकमि
वबंधनान्मृत्योर्मुक्षीयमामृतात्॥ नेत्राभ्यांनमः॥ ॐ नमः स्रुत्यायच

॥१॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

पथ्यायच॥कर्णाभ्यां०॥ॐ मानस्तोके तनये मान ऽआयुषि मानो गोषु मा
नो ऽअश्वेषुरीरिषः॥वीरान्मानो रुद्र भामितो वधीर्हविष्मंतो नमसा विधेम
ते॥नासिकायै नमः॥अवतत्य धनुस्त्वꣳ सहस्राक्ष शतेषुधे॥निशीर्य शल्या
नांमुखा शिवो नः सुमना भव॥मुखाय नमः॥ॐ नीलग्रीवाः शितिकंठाः
शर्वा ऽअधः क्षमाचराः॥तेषाꣳ स०॥कंठाय नमः॥ॐ नीलग्रीवाः शितिकं
ठा दिवꣳ रुद्रा ऽउपश्रिताः॥तेषाꣳ स०॥उपकंठाय०॥ॐ नमस्ते ऽआयु
धायानाततायधृष्णवे॥उभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने॥बाहुभ्यां
नमः॥ॐ यातेहेतिर्मीढुष्टम हस्ते बभूव ते धनुः॥तयास्मान्विश्वतस्त्वमय
क्ष्मया परिभुज॥उपबाहुभ्यां०॥ॐ येतीर्थानि प्रचरंति सृकावंतो निषं

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

महान्या· गिणः॥ तेषांगं स०॥ हस्ताभ्यां०॥ ॐ सद्योजातंप्रपद्यामिसद्योजातायवैन
॥२॥ मोनमः॥ भवेभवेनातिभवेभवस्वमां॥ भवोद्भवायनमः॥ ॐ अंगुष्ठाभ्यां०॥
ॐ वामदेवायनमोज्येष्ठायनमःश्रेष्ठायनमोरुद्रायनमःकालायनमःक
लविकरणायनमोबलविकरणायनमोबलायनमोबलप्रमथनायन
मःसर्वभूतदमनायनमोमनोन्मनायनमः॥ तर्जनीभ्यां०॥ ॐ अघोरे
भ्योथघोरेभ्यो घोरघोरतरेभ्यः॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेऽअस्तु
रुद्ररूपेभ्यः॥ मध्यमाभ्यां०॥ ॐ तत्पुरुषायविद्महेमहादेवायधीमहि॥ ॥राम॥
तन्नोरुद्रः प्रचोदयात्॥ अनामिकाभ्यां०॥ ॐ ईशानःसर्वविद्यानामी
श्वरःसर्वभूतानांब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेऽअस्तुस

॥२॥

दाशिवों॥ कनिष्ठिकाभ्यां०॥ ॐ नमो वः किरिकेभ्यो देवानाꣳ हृदयेभ्यः॥
हृदयाय०॥ ॐ नमो गणेभ्यो गणपतिभ्यश्च वो नमः॥ पृष्ठेय नमः॥ ॐ न
मो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः॥ पार्श्वाभ्यां०॥ ॐ विज्यं ध
नुः कपर्दिनो विशल्यो बाणवाꣳ उत॥ अनेशन्नस्येषव ऽआभुरस्य निषं
गथिः॥ जठराय०॥ ॐ हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरे
कऽआसीत्॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ ना
भ्यै०॥ ॐ मीढुष्टम शिवतम शिवो नः सुमना भव॥ परमे वृक्षऽआयुधं
निधाय कृत्तिं वसानऽआचर पिनाकं बिभ्रदागहि॥ कटिभ्यां० ॐ ये भू
तानामधिपतयो विशिखासः कपर्दिनः॥ तेषाꣳ सह० गुह्याय० ॐ सशि

joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

म॰न्या॰ राजातवेदाः॥अक्षरंब्रह्मसंमितं॥वेदानाꣳशिरऽउत्तमं॥जातवेदसेशिर
॥३॥ सामाता॥स्वयंब्रह्मभूर्भुवःसुवरों॥जातवेदसेसुनवामसोममरातीयतो
निदहातिवेदः॥सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्यग्निः॥
तामग्निवर्णांतपसाज्वलंतींवैरोचनींकर्मफलेषुजुष्टां॥दुर्गांदेवींꣳशरणमम्
हंप्रपद्येसुतरसितरसेनमः॥अग्नेत्वंपारयानव्योऽअस्मान्स्वस्तिभिरतिदु
र्गाणिविश्वा॥पूश्चपृथ्वीबहुलानऽउर्वीभवातोकायतनयायशंयोः॥विश्वा
निनोदुर्गहाजातवेदःसिंधुंननावादुरितातिपर्षि॥अग्नेऽअत्रिवन्मनसागृ ॥ राम ॥
२ णानोस्माकंबोध्यविताततूनां॥पृतनाजितꣳसहमानमुग्रमग्निꣳहुवेमपर
मात्सधस्थात्॥सनःपर्षदतिदुर्गाणिविश्वाक्षामहेवोऽअतिदुरितात्यग्निः॥
॥३॥

"Joint project of Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

अपानाय०॥ॐ मानोमहांतमुतमानोऽअर्भकं मानऽउक्षंतमुतमानऽउक्षितं॥
मानोवधीः पितरं मोतमातरं प्रिया मानस्तनुवोरुद्ररीरिषः॥ऊरुभ्यां०॥
ॐ एषतेरुद्रभागस्तंजुषस्वतेनावसेनपरोमूजवतोतीह्यवततधन्वापिना
कहस्तःकृत्तिवासाः॥जानुभ्यां०॥ॐ सऽसृष्टजित्सोमपाबाहुशर्ध्यूर्ध्वध
न्वाप्रतिहिताभिरस्ता॥बृहस्पतेपरिदीयारथेनरक्षोहामित्राँ२ऽअपबाध
मानः॥जंघाभ्यां०॥ॐ विश्वंभूतंभुवनंचित्रंबहुधाजातंजायमानंचयत्॥
सर्वोह्येषरुद्रस्तस्मैरुद्रायनमोऽअस्तु॥गुल्फाभ्यां॥ॐ येपथांपथिरक्षय
य ऽऐलबृदायुर्युधः॥तेषाँ२ सह०॥ पादाभ्यां नम०॥ॐ अध्यवोचदधिवक्ताप्रथ
मोदैव्योभिषक्॥अहीँ२श्चसर्वान्जंभयन्सर्वाश्चयातुधान्यः॥कवचा

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai joint project

म॰न्या॰ यहं॥ॐ नमो बिल्मिने च कवचिने च॥ उपकव चाय हं॥ॐ नमोऽअस्तुनी
॥४॥ ल ग्रीवाय सहस्राक्षाय मीढुषे॥ अथो ये ऽअस्य सत्वानोहं तेभ्यो करं नमः॥
तृतीयनेत्राय नमः॥ॐ प्रमुंच धन्वनस्त्वमुभयोरार्त्नि योर्ज्यां॥ याश्चते
हस्तऽइषवः परातां भगवो वप॥ अस्त्राय फट्॥ॐ यऽएतावंतश्च भूयांसः
सश्च दिशो रुद्रा वितस्थिरे॥ तेषां सह०॥ इति दिग्बंधः॥ प्राच्यादिदशदिग्भ्यो
नमः॥ॐ मूर्ध्ने नमः॥ नं नासिकायै०॥ मों ललाटाय०॥ भं मुखाय०॥ गं
कंठाय०॥ वं हृदयाय०॥ तें दक्षिणहस्ताय०॥ रुं वामहस्ताय०॥ द्रां नाभ्यै०॥ यं ॥राम॥
पादाभ्यां०॥ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः॥ भवे भवे ना
ति भवे भवस्व मां॥ भवोद्भवाय नमः॥ पादाभ्यां०॥ॐ वामदेवाय नमो ज्ये
ष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो ब ॥५॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

लविकरणायनमोबलायनमोबलप्रमथनायनमः सर्वभूतदमनायनमो
मनोन्मनायनमः॥ ऊरुमध्याभ्यां०॥ ॐ अघोरेभ्योथघोरेभ्योघोरघोरत
रेभ्यः॥ सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽअस्तुरुद्ररूपेभ्यः॥ हृदयाय०॥
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि॥ तन्नोरुद्रः प्रचोदयात्॥ मुखा
य०॥ ॐ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणो
धिपतिर्ब्रह्मा शिवोमेऽअस्तु सदाशिवों॥ शिरसे स्वाहा॥ ॐ हंसाय नमः॥
ॐ परमहंसाय नमः॥ ॐ हंसहंसेति यो ब्रूयाद्धंसो नाम सदाशिवः॥ एवंन्या
सविधिं कृत्वा ततः संपुटमारभेत्॥ ॐ त्रातारमिंद्रमवितारमिंद्रꣳ हवे
हवे सुहवꣳ शूरमिंद्रं॥ हुवे नु शक्रं पुरुहूतमिंद्रꣳ स्वस्ति नो मघवा धात्विंद्रः॥
ललाटस्थानेऽइंद्राय नमः॥ ॐ त्वंनोऽअग्नेवरुणस्य विद्वान्देवस्य हेडोवया

म॰न्या॰ मिमीष्ठाः॥ यजिष्ठोव [illegible] ह्नितमः शोशुचानो विश्वाद्वेषांसि प्रमुमुग्ध्यस्म
॥५॥ त्॥ नेत्रस्थाने अग्नये नमः॥ ॐ सुगंनः पंथामभयंकृणोतु॥ यस्मिन्न
क्षत्रेयम ऽएतिराजा॥ यस्मिन्नेनमभ्यषिंचंतदेवाः॥ तदस्यचित्रंऽहं
विषा [illegible] यजाम॥ कर्णस्थाने यमाय॰॥ ॐ असुन्वंतमयजमानमिच्छस्ते
नस्येत्यांतस्करस्यान्वेषि॥ अन्यमस्मादिच्छ मात ऽइत्यानमोदेविनिर्ऋ
ते तुभ्यमस्तु॥ मुखस्थाने निर्ऋतये॰॥ ॐ तत्वायामिब्रह्मणावंदमानस्त
दाशास्तेयजमानोहविर्भिः॥ अहेडमानोवरुणेहबोध्युरुशंसमान ऽआ
युः प्रमोषीः॥ बाहुस्थाने वरुणाय॰॥ ॐ आनोनियुद्भिः शतिनीभिर ॥ राम॥
ध्वरंऽसहस्रिणीभिरुपयाहियज्ञं॥ वायो ऽअस्मिन्हविषिमादयस्वयू
यंपातस्वस्तिभिः सदानः॥ नासिकस्थाने वायवे॰॥ ॐ वयंऽसोमव्रतेत ॥५॥

व॥ मनस्तनूषु बिभ्रतः॥ प्रजावंतोऽअशीमहि॥ हृदिस्थाने सोमाय०॥
ॐ तमीशानं जगतस्तस्थुषस्पतिं धियंजिन्वमवसे हूमहे वयं॥ पूषानो
यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये॥ नाभिस्थानेऽईशानाय०॥
ॐ अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः॥ यः शंसते स्तु
वते धायि पज्रऽइंद्रज्येष्ठाऽअस्माँऽअवंतु देवाः॥ मूर्ध्निस्थानेऽएकादश
रुद्रेभ्यो०॥ ॐ स्योना पृथिवि भवान्नृक्षरा निवेशनी॥ यच्छानः शर्म सप्र
थाः॥ पादस्थाने भूम्यै०॥ ॐ एवं तत्पुरमिंद्रादीन्दिक्षु विन्यस्यैवमेवा
त्मनि रौद्रीकरणं कृत्वा॥ त्वगस्थिगतैः पापैः प्रमुच्यते॥ सर्वभूतेष्वपरा
जितो भवति॥ ततो भूतप्रेतपिशाचब्रह्मराक्षसयक्षयमदूतशाकि
नीडाकिनीसर्पश्वापदतस्कराद्युपद्रवाद्युपघाताः सर्वे ज्वलंतं पश्यंतु॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

म॰न्या॰
॥६॥

माꣳरक्षंतु॥ यजमानꣳरक्षंतु॥ ॐमनोज्योतिर्जुषतामाज्यंविच्छिन्नं
यज्ञꣳसमिमंदधातु॥ याइष्टाउषसोनिम्रुचश्चताःसंदधामिहविषा
घृतेन॥ गुह्याय०॥ ॐअबोध्यग्निःसमिधाजनानांप्रतिधेनुमिवाय
तीमुषासं॥ यह्वाइवप्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाकमछ॥
अग्नयेनमः॥ ॐमूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतायजात
मग्निं॥ कविꣳसम्राजमतिथिंजनानामासन्नापात्रंजनयंतदेवाः॥ हृद
याय०॥ ॐमर्माणितेवर्मणाछादयामिसोमस्त्वाराजामृतेनाभिवस्तां॥
उरोर्वरीयोवरिवस्तेअस्तुजयंतंत्वामनुमदंतुदेवाः॥ मुखाय०॥ ॐजात ॥राम॥
वेदायदिवापावकोसि॥ वैश्वानरोयदिवावैद्युतोसि॥ शंप्रजाभ्यो
यजमानायलोकं॥ ऊर्जंपुष्टिंददद्भ्याववृत्स्व॥ शिरसेस्वाहा॥ आत्म ॥६॥

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai."

रक्षाकर्तव्या ॥ ॐ ब्रह्मात्मन्वदसृजत ॥ तदकामयत ॥ समात्मनापद्येयेति ॥
आत्मंन्नात्मन्नित्यामंत्रयत ॥ तस्मैदशमꣳ हूतः प्रत्यशृणोत् ॥ सदशहू
तोभवत् ॥ दशहूतोहवैनामैषः ॥ तंवाएतंदशहूतꣳ संतं ॥ दशहोतेत्याचक्षतेप
रोक्षेण ॥ परोक्षप्रियाइवहिदेवाः ॥ आत्मंन्नात्मं० ॥ तस्मैसप्तमꣳ हूतःप्रत्य
शृणोत् ॥ ससप्तहूतोभवत् ॥ सप्तहूतोहवैनामैषः ॥ तंवाएतꣳ सप्तहूतꣳ
संतं ॥ सप्तहोतेत्या० ॥ परोक्ष० ॥ आत्मंन्नात्मं० ॥ तस्मैषष्ठꣳ हूतः प्रत्यशृणो
त् ॥ सषड्ढूतोभवत् ॥ षड्ढूतोहवैनामैषः ॥ तंवाएतꣳ षड्ढूतꣳ संतं ॥ षड्ढोते
च त्याचक्षतेपरोक्षेण ॥ परोक्षप्रि० ॥ आत्मंन्नात्मं० ॥ तस्मैपंचमꣳ हूतः प्रत्यशृणो
त् ॥ सपंचहूतोभवत् ॥ पंचहूतोहवैनामैषः ॥ तंवाएतंपंचहूतꣳ संतं ॥ पं
चहोते० ॥ परोक्षप्रि० ॥ आत्मंन्नात्मं० ॥ तस्मैचतुर्थꣳ हूतः प्रत्यशृणोत् ॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai

म॰न्या॰ सचतुर्हृतोभवत्॥ चतुर्हृतोह॰॥ तंवा॰एतंचतुर्हृतं॰ संतं॥ चतुर्होतेत्या॰॥ पुरो॰॥
॥७॥ तमब्रवीत्॥ त्वंवैमेनेदिष्ठं॰ हूतःप्रत्यश्रोषीः॥ त्वयैनानारव्यातार
इति॥ तस्मान्नुहैनां॰श्चतुर्होतारऽइत्याचक्षते॥ तस्माच्छुश्रूषुःपुत्राणां॰ हृ
द्यतमः॥ नेदिष्ठोहृद्यतमः॥ नेदिष्ठोब्रह्मणोभवति॥ यऽएवंवेद॥ ॐ यज्जाग्र
तोदूरमुदैतुदैवंतदुसुप्तस्यतथैवैति॥ दूरंगमंज्योतिषांज्योतिरेकंतन्मेमनः
शिवसंकल्पमस्तु॥ येनकर्माण्यपसोमनीषिणोयज्ञेकृण्वंतिविदथेषुधी
राः॥ यदपूर्वंयक्षमंतःप्रजानांतन्मे॰॥ यत्प्रज्ञानमुतचेतोधृतिश्चयज्ज्यो
तिरंतरमृतंप्रजासु॥ यस्मान्नऽऋतेकिंचनकर्मक्रियतेतन्मे॰॥ येनेदं ॥ राम॥
भूतंभुवनंभविष्यत्परिगृहीतममृतेनसर्वं॥ येनयज्ञस्तायतेसप्तहोता
तन्मे॰॥ यस्मिन्नृचःसामयजूं॰षियस्मिन्प्रतिष्ठितारथनाभाविवाराः॥
॥७॥

यस्मिंश्चित्तं सर्वमोतं प्रजानां तन्मे०॥ सुषारथिरश्वानिव यंमनुष्यान्ने
नीयतेभीशुभिर्वाजिनऽइव॥ हृत्प्रतिष्ठं यदजिरं यविष्ठं तन्मे०॥ हृदयाय०॥
ॐ सहस्रशीर्षा पुरुषः॥ सहस्राक्षः सहस्रपात्॥ स भूमिं विश्वतो वृत्वा॥
अत्यतिष्ठद्दशांगुलं॥ पुरुषऽएवेदं सर्वं॥ यद्भूतं यच्च भव्यं॥ उतामृतत्व
स्येशानः॥ यदन्नेनातिरोहति॥ एतावानस्य महिमा॥ अतो ज्यायांश्च
पूरुषः॥ पादोस्य विश्वा भूतानि॥ त्रिपादस्यामृतं दिवि॥ त्रिपादूर्ध्व उदैत्पु
रुषः॥ पादोस्येहाभवत्पुनः॥ ततो विष्वङ् व्यक्रामत्॥ साशनानशनेऽअभि॥
तस्माद्विराडजायत॥ विराजोऽअधिपूरुषः॥ स जातोऽअत्यरिच्यत॥ पश्चा
द्भूमिमथो पुरः॥ यत्पुरुषेण हविषा॥ देवा यज्ञमतन्वत॥ वसंतो अस्यासीदा
ज्यं॥ ग्रीष्मऽइध्मः शरद्धविः॥ सप्तास्यासन्परिधयः॥ त्रिः सप्त समिधः कृ

Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

न्

म॰न्या॰ ताः ॥ देवाय द्यज्ञंतन्वाना ः॥ अबध्नंपुरुषंपशुं ॥ तंयज्ञंबर्हिषिप्रौक्षन् ॥
॥ ८ ॥ पुरुषंजातमग्रतः॥ तेनदेवाऽअयजंत॥ साध्याऽऋषयश्चये॥ तस्माद्यज्ञात्स
र्वहुतः॥ संभृतंपृषदाज्यं॥ पशूंस्तांश्चक्रेवायव्यान्॥ आरण्यान्ग्राम्या
श्चये॥ तस्माद्यज्ञात्सर्वहुतः॥ ऋचःसामानिजज्ञिरे॥ छंदांसिजज्ञिरेतस्मा
त्॥ यजुस्तस्मादजायत॥ तस्मादश्वाऽअजायंत॥ येकेचोभयादतः॥ गावो
हजज्ञिरेतस्मात्॥ तस्माज्जाताऽअजावयः॥ यत्पुरुषंव्यदधुः॥ कतिधाव्य
कल्पयन्॥ मुखंकिमस्यकौबाहू॥ काऊरूपादावुच्येते॥ ब्राह्मणोस्यमुख
मासीत्॥ बाहूराजन्यःकृतः॥ ऊरूतदस्ययद्वैश्यः॥ पद्भ्यांशूद्रोअजाय ॥ रास ॥
त॥ चंद्रमामनसोजातः॥ चक्षोःसूर्योऽअजायत॥ मुखादिंद्रश्चाग्निश्च॥
प्राणाद्वायुरजायत॥ नाभ्याआसीदंतरिक्षं॥ शीर्ष्णोद्यौःसमवर्तत॥ पद्भ्यां ॥ ८ ॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

भूमिर्दिशः श्रोत्रात्॥ तथा लोकाꣳ अकल्पयन्॥ वेदाहमेतं पुरुषं महांतं॥ आदित्यव
र्णं तमसस्तु पारे॥ सर्वाणि रूपाणि विचित्य धीरः॥ नामानि कृत्वाभिवदन्यदा
स्ते॥ धाता पुरस्ताद्यमुदाजहार॥ शक्रः प्रविद्वान्प्रदिशश्चतस्रः॥ तमेवं विद्वानमृ
तऽइह भवति॥ नान्यः पंथाऽअयनाय विद्यते॥ यज्ञेन यज्ञमयजंत देवाः॥ तानि
धर्माणि प्रथमान्यासन्॥ ते ह नाकं महिमानः सचंते॥ यत्र पूर्वे साध्याः संति देवाः॥
शिरसे स्वाहा॥ ॐ अद्भ्यः संभृतः पृथिव्यै रसाच्च॥ विश्वकर्मणः समवर्तताधि॥
तस्य त्वष्टा विदधद्रूपमेति॥ तत्पुरुषस्य विश्वमाजानमग्रे॥ वेदाहमेतं पुरुषं
महांतं॥ आदित्यवर्णं तमसः परस्तात्॥ तमेवं विद्वानमृतऽइह भवति॥ नान्यः पं
था विद्यतेऽयनाय॥ प्रजापतिश्चरति गर्भेऽअंतः॥ अजायमानो बहुधा विजा
यते॥ तस्य धीराः परिजानंति योनिं॥ मरीचीनां पदमिच्छंति वेधसः॥ यो देवेभ्य

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

म०न्या० आतपति॥ योदेवानांपुरोहितः॥ पूर्वोयोदेवेभ्योजातः॥ नमोरुचायब्राह्मये॥रु
॥१॥ चंब्राह्मंजनयंतः॥ देवाऽअग्रेतदब्रुवंन्॥ यस्त्वैवंब्राह्मणोविद्यात्॥ तस्यदेवा
ऽअसन्वशे॥ ह्रीश्चतेलक्ष्मीश्चपत्न्यौ॥ अहोरात्रेपार्श्वे॥ नक्षत्राणिरूपं॥ अ
श्विनौव्यात्तं॥ इष्टंमनिषाण॥ अमुंमनिषाण॥ सर्वंमनिषाण॥ शिरवायैवष
ट्॥ ॐ आशुःशिशानोवृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनां॥
संक्रंदनोनिमिषऽएकवीरःशतꣳसेनाऽअजयत्साकमिंद्रः॥ संक्रंदनेनानि
मिषेणजिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना॥ तदिंद्रेणजयततत्सह
ध्वंयुधोनरऽइषुहस्तेनवृष्णा॥ सऽइषुहस्तैःसनिषंगिभिर्वशीसꣳस्र ॥राम॥
ष्टासयुधऽइंद्रोगणेन॥ सꣳसृष्टजित्सोमपाबाहुशर्ध्यूर्ध्वधन्वाप्रतिहि ॥१॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ताभिरस्तु॥ बृहस्पतेपरिदीयारथेनरक्षोहामित्राँ॥ अपबाधमानः॥ प्रभंज
न्त्सेनाः प्रमृणोयुधाजयंनस्माकमेध्यविता रथानां॥ गोत्रभिदंगोविदंवज्र
बाहुंजयंतमज्मप्रमृणंतमोजसा॥ इमँसजाताऽअनुवीरयध्वमिंद्रँस
खायोनुसँरभध्वं॥ बलविज्ञायः स्थविरः प्रवीरः सहस्वान्वाजीसहमानऽउग्रः॥
अभिवीरोऽअभिसत्वासहोजाजैत्रमिंद्ररथमातिष्ठगोवित्॥ अभिगोत्रा
णिसहसागाहमानोदायोवीरः शतमन्युरिंद्रः॥ दुश्च्यवनः पृतनाषाडयुध्यो
स्माकँसेनाऽअवतुप्रयुत्सु॥ इंद्रऽआसांनेता बृहस्पतिर्दक्षिणायज्ञः पुरऽए
तुसोमः॥ देवसेनानामभिभंजतीनांजयंतीनांमरुतोयंत्वग्रं॥ इंद्रस्यवृष्णोव
रुणस्यराज्ञऽआदित्यानांमरुतांशर्धऽउग्रं॥ महामनसांभुवनच्यवानांघो
षोदेवानांजयतामुदस्थात्॥ अस्माकमिंद्रः समृतेषुध्वजेष्वस्माकंयाइषव

म॰न्या॰

॥१०॥

स्ताजेयंतु॥ अस्माकंवीराऽउत्तरेभवंत्वस्मानुदेवाऽअवताहवेषु॥ उद्धर्षयमघवन्ना
युधान्युत्सत्वनांमामकानांमहांऽसि॥ उद्वृत्रहन्वाजिनांवाजिनान्युद्रथानांजयतां
मेतुघोषः॥ उपप्रेतजयतानरः स्थिरावःसंतुबाहवः॥ इंद्रोवःशर्मयछत्वनाधृष्या
यथासथ॥ अवसृष्टापरापतशरव्येब्रह्मसंशिता॥ गछामित्रान्प्रविशमैषांकं
चनोछिषः॥ मर्माणितेवर्मणाछादयामिसोमस्त्वाराजामृतेनाभिवस्तां॥ उरोर्व
रीयोवरिवस्तेऽअस्तुजयंतंत्वामनुमदंतुदेवाः॥ यत्रबाणाःसंपतंतिकुमाराविं
शिखाऽइव॥ इंद्रोनस्तत्रवृत्रहाविश्वाहाशर्मयछतु॥ अप्रतिरथंकववचायहुं॥ ॐ ॥ राम ॥
त्वमग्नेरुद्रोऽअसुरोमहोदिवः॥ त्वंशर्धोमारुतंपृक्षईशिषे॥ त्वंवातैररुणैर्यासि
शंगयः॥ त्वंपूषाविधतःपासिनुत्मना॥ देवादेवेषुश्रयध्वं॥ प्रथमाद्वितीयेषुश्रय

॥१०॥

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yeshwantrao Chavan Pratishthan, Mumbai.

ध्वं॥ द्वितीयास्तृतीयेषु श्रयध्वं॥ तृतीयाश्चतुर्थेषु श्रयध्वं॥ चतुर्थाः पंचमेषु श्रयध्वं॥
पंचमाः षष्ठेषु श्रयध्वं॥ षष्ठाः सप्तमेषु श्रयध्वं॥ सप्तमाऽअष्टमेषु श्रयध्वं॥ अष्टमा
नवमेषु०॥ नवमादशमेषु०॥ दशमाऽएकादशेषु०॥ एकादशाद्वादशेषु०॥ द्वादशास्त्र
योदशेषु०॥ त्रयोदशाश्चतुर्दशेषु०॥ चतुर्दशाः पंचदशेषु०॥ पंचदशाः षोडशेषु०॥
षोडशाः सप्तदशेषु०॥ सप्तदशाऽअष्टादशेषु०॥ अष्टादशाऽएकान्नविꣳशेषु०॥ ए
कान्नविꣳशाविꣳशेषु०॥ विꣳशाऽएकविꣳशेषु०॥ एकविꣳशाद्वाविꣳशेषु०॥ द्वाविꣳ
शास्त्रयोविꣳशेषु०॥ त्रयोविꣳशाश्चतुर्विꣳशेषु०॥ चतुर्विꣳशाः पंचविꣳशेषु०॥
पंचविꣳशाः षड्विꣳशेषु०॥ षड्विꣳशाः सप्तविꣳशेषु०॥ सप्तविꣳशाऽअष्टाविꣳशे
षु०॥ अष्टाविꣳशाऽएकान्नत्रिꣳशेषु०॥ एकान्नत्रिꣳशास्त्रिꣳशेषु०॥ त्रिꣳशाऽ
एकत्रिꣳशेषु०॥ एकत्रिꣳशाद्वात्रिꣳशेषु०॥ द्वात्रिꣳशास्त्रयस्त्रिꣳशेषु श्रयध्वं॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

म॰न्या॰ देवास्त्रिरेकादशास्त्रिस्त्रयस्त्रिंशाः॥ उत्तरे भव॥ उत्तरवर्त्मनि ऽ उत्तरसत्वानः॥
॥२२॥ यत्काम ऽ इदं जुहोमि॥ तन्मे समृध्यतां॥ वयं स्याम पतयो रयीणां॥ भूर्भुवः स्वः स्वा वः
हा॥ अस्त्राय फट्॥ ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक ऽ आ
सीत्॥ स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम॥ यः प्राणतो नि
मिषतो महित्वैक ऽ इद्राजा जगतो बभूव॥ य ऽ ईशे ऽ अस्य द्विपदश्चतुष्पदः कस्मै
देवाय हविषा ऽ विधेम॥ ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन ऽ आवः॥
स बुध्न्या ऽ उपमा ऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥ मही द्यौः पृ श्च
थिवी च न ऽ इमं यज्ञं मिमिक्षतां॥ पिपृतां नो भरीमभिः॥ उपश्वासय पृथिवी ॥ राम ॥
मुत द्यां पुरुत्रा ते मनुतां विष्ठितं जगत्॥ स दुन्दुभे सजूरिन्द्रेण देवैर्दूराद्दवीयो ऽ
अपसेध शत्रून्॥ अग्ने नय सुपथा राये ऽ अस्मान्विश्वानि देव वयुनानि विद्वान्॥ ॥२२॥

Joint project of the Rajawade Sanshodhan Mandal, Dhule and Yashwantrao Chavan Pratishthan, Mumbai.

युयोध्यास्मज्जुहुराणमेनोभूयिष्ठांतेनमउक्तिंविधेम॥ यातेऽअग्नेयज्ञियात
नूस्तयेह्यारोहात्मात्मानं॥ अछावसूनिकृण्वन्नस्मेनर्यापुरूणि॥ यज्ञोभूत्वा
यज्ञमासीदस्वांयोनिं॥ जातवेदोभुवऽआजायमानःसक्षयऽएहि॥ इमंयमप्रस्त
रमाहिसीदांगिरोभिःपितृभिःसंविदानः॥ आत्वामंत्राःकविशस्तावहंत्वेना
राजन्हविषामादयस्व॥ उरसाशिरसादृष्ट्यामनसावचसातथा॥ पद्भ्यांकरा
भ्यांजानुभ्यांप्रणामोऽष्टांगऽउच्यते॥ ॥ अथलघुन्यासप्रारंभः॥ ॐ ॥ प्र
जननेब्रह्मातिष्ठतु॥ पादयोर्विष्णुस्तिष्ठतु॥ हस्तयोर्हरस्तिष्ठतु॥ बाह्वोरिंद्र
स्तिष्ठतु॥ जठरेऽअग्निस्तिष्ठतु॥ हृदयेशिवस्तिष्ठतु॥ कंठेवसवस्तिष्ठंतु॥ व
क्त्रेसरस्वतीतिष्ठतु॥ नासिकयोर्वायुस्तिष्ठतु॥ नयनयोःसूर्याचंद्रमसौति
ष्ठतां॥ कर्णयोरश्विनौदेवौतिष्ठतां॥ ललाटेरुद्रास्तिष्ठंतु॥ मूर्ध्न्यादित्यास्ति

म॰न्या॰ ष्ठंतु॥ शिरसिमहादेवस्तिष्ठतु॥ शिखायांचामुंडातिष्ठतु॥ पृष्ठेपिनाकीति
॥१२॥ ष्ठतु॥ पुरतः शूलीतिष्ठतु॥ पार्श्वयोः शिवाशंकरौतिष्ठतां॥ सर्वतोवायुस्ति
ष्ठतु॥ ततोबहिः सर्वतोग्निज्वालामालापरिवृतस्तिष्ठंतु॥ सर्वेष्वंगेषुसर्वा
देवतायथायथास्थानानितिष्ठंतु॥ मांरक्षंतु यजमानंरक्षंतु॥ अग्निर्मे
वाचिश्रितः॥ वाग्घृदये॥ हृदयंमयि॥ अहममृते॥ अमृतंब्रह्मणि॥ वायु
र्मेप्राणेश्रितः॥ प्राणोहृदये॥ हृदयं॰॥ अहम॰॥ अमृतंब्रह्मणि॥ सूर्योमे
चक्षुषिश्रितः॥ चक्षुर्हृदये॥ हृदयं॰॥ अहम॰॥ अमृतं॰॥ चंद्रमामेमनसि ॥ राम॥
श्रितः॥ मनोहृदये॥ हृदयं॰॥ अहम॰॥ अमृतं॰॥ दिशोमेश्रोत्रेश्रिताः॥
श्रोत्रंहृदये॥ हृदयं॰॥ अहम॰॥ अमृतं॰॥ आपोमेरेतसिश्रिताः॥ रेतोहृ
दये॥ हृदयं॰॥ अहम॰॥ अमृतं॰॥ पृथिवीमेशरीरेश्रिता॥ शरीरंहृदये॥ ॥१२॥

हृदयं०॥अहम०॥अमृतं०॥ओषधिवनस्पतयोमेलोमसुश्रिताः॥लोमानि
हृदये॥हृदयं०॥अहम०॥अमृतं०॥इंद्रोमेबलेश्रितः॥बलंहृदये॥हृदयं॥
अहम०॥अमृतं०॥पर्जन्योमेमूर्ध्निश्रितः॥मूर्धाहृदये॥हृदयं०॥अहम०॥
अमृतं०॥ईशानोमेमन्यौश्रितः॥मन्युर्हृदये॥हृदयं०॥अहम०॥अमृतं०॥
आत्मामऽआत्मनिश्रितः॥आत्माहृदये०॥हृदयं०॥अहम०॥अमृतं०॥
पुनर्मऽआत्मापुनरायुरागाव॥पुनःप्राणःपुनराकूतमागात॥वैश्वानरोर
श्मिभिर्वावृधानः॥अंतस्तिष्ठत्वमृतस्यगोपाः॥सर्वेष्वंगेषुसर्वादेवताय
थायथास्थानानितिष्ठंतु॥मांरक्षंतु॥यजमानंरक्षंतु॥ ॥शुद्धस्फ
टिकसंकाशंत्रिनेत्रंपंचवक्त्रकं॥गंगाधरंदशभुजंसर्वाभरणभूषितं॥
नीलग्रीवंशशांकांकंनागयज्ञोपवीतिनं॥व्याघ्रचर्मोत्तरीयंचवरेण्यमभी

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

म॰न्या॰ यप्रदं ॥ कमंडल्वक्षसूत्राभ्यामन्वितं शूलपाणिनं ॥ ज्वलंतं पिंगलजटाशि
॥ १३ ॥ खमुद्योतकारिणं ॥ दिव्यसिंहासनासीनं दिव्यभोगसमन्वितं ॥ दिग्देवता
समायुक्तं सुरासुरनमस्कृतं ॥ नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययं ॥ सर्व
व्यापिनमीशानं रुद्रं वै विश्वरूपिणं ॥ एवं ध्यात्वा द्विजः सम्यक्ततो जयन
मारभेत् ॥ आराधितो मनुष्यैस्त्वं सिद्धैर्देवासुरादिभिः ॥ आराधयामि
भक्त्या त्वां मां गृहाण महेश्वर ॥ आत्वा वहंतु हरयः सचेतसः श्वेतैरश्वैः स
ह केतुमद्भिर्वाताजवै बलवद्भिर्मनोजवैरायाहि शीघ्रं ॥ मम हव्याय शर्वो
म् ॥ स्वामिन्सर्वजगन्नाथ यावत्पूजावसानकं ॥ तावत्त्वं प्रीतिभावेबिंदेवोस्मि ॥ राम ॥
न्सोनिधो भव ॥ शांतो भव वरदो भव ॥ अथोत्तरन्यासः ॥ ॐ सुषारथिरश्वा
निव यंमनुष्यान्नेनीयतेभीशुभिर्वाजिनऽइव ॥ हृत्प्रतिष्ठंयदजिरं यविष्ठं त ॥ १३ ॥

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan

न्मेमनः शिवसंकल्पमस्तु ॥ हृदयाय० ॥ ॐ यज्ञेनयज्ञमयजंतदेवाः ॥ तानिध
र्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानः सचंते ॥ यत्रपूर्वेसाध्याः संतिदेवाः ॥
शिरसेस्वाहा ॥ ॐ ह्रीश्चतेलक्ष्मीश्चपत्न्यौ ॥ अहोरात्रेपार्श्वे ॥ नक्षत्राणिरू
पं ॥ अश्विनौव्यात्तं ॥ इष्टंमनिषाण ॥ अमुंमनिषाण ॥ सर्वंमनिषाण ॥ शि
खायैवषट् ॥ ॐ यत्रबाणाः संपतंतिकुमाराविशिखाऽइव ॥ इंद्रोनस्तत्र
वृत्रहाविश्वाहाः शर्मयच्छतु ॥ कवचायहुं ॥ ॐ देवास्त्रिरेकादशास्त्रिस्त्रयश्च
त्रिंशाः ॥ उत्तरेभवत ॥ उत्तरवर्त्मानिऽउत्तरसत्वानः ॥ यत्कामऽइदंजुहोमि ॥
तन्मेसमृध्यतां ॥ वयंस्यामपतयोरयीणां ॥ ॐ भूर्भुवः स्वः स्वाहा ॥ अ
स्त्रायफट् ॥ ॐ आभिर्गीर्भिर्यदतोनऽऊनमाप्याययहरिवोवर्धमानः ॥ यदास्तोतृ
भ्योमहिगोत्रारुजासिभूयिष्ठभाजोऽअधतेस्याम ॥ ब्रह्मप्रावादिष्मतन्नोमहा
सीर्त ॥ : ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शाके १८०२ भाद्र॰ शु॰ १ प्र॰ र॰ ॥ जोशीइलुपना शंकरेनलि

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(15)

म·न्या·

॥१५॥

॥श्री॥ अथमहान्याससमाप्तः॥श्रीगुरवेनमः॥

॥राम॥

॥१५॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

# मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com